# O. P. JINDAL SCHOOL, SAVITRI NAGAR
## SAMPLE QUESTION PAPER
## Annual Examination (2022 – 2023)

**Class / Section: VII** **MM: 80**
**Subject: Sanskrit** **Time: 3.00 Hrs.**
Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***
***General Instructions:* All questions are compulsory**

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | पठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्त व्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वेप्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्न संख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## (खण्ड–क) पठितअवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

एकस्मिन् आश्रमे महातपः नाम एकः मुनिः अवसत्। एकदा सः बिडालात् भीतम् एकम् मूषकम् अपश्यत्। सः तपः प्रभावेण तं मूषकम् अपि बिडालः अकरोत्। अधुना सः बिडालः कुक्कुरात् बिभेति। तदा सः मुनि बिडालस्य उपरि जलम् परिसिंचन अवदत्– ''त्वम् कुक्कुरः भव।'' बिडालः त ुतदा कुक्कुरः अभवत् अधुना एकस्मिन् दिवस`सिंहात् भीतः कुक्कुरः मुनेः समीपम् आगच्छत्। मुनिः कुक्कुरम् सिंहः इति अकरोत् । सिंहः भूत्वा सः निर्भयम् इतः ततः भ्रमति स्म।सर्वे कथयन्ति स्म– ''धन्य एषः महातपः, यस्य कृपया मूषकः सिंहः अभवत्।'' एतत् श्रुत्वा सिंहः अचिन्तयत्–यावत् अयंमुनिः जीवति तावत् मम अपकीर्तिः एव भविष्यति। सिंहः च एतत् विचार्य मुनिम् मारयितुं गतः।तस्य कृतघ्नस्य दुर्भावम् ज्ञात्वा मुनिः अशपत्– ''पुनः मूषकः भव।''

**I एकपदेन उत्तरत–** **(½x4=2)**

i महातपः कुत्र अवसत् ?
ii मूषकः कस्मात् भीतः आसीत् ?
iii कुक्कुरः कस्मात् भीतः आसीत् ?
iv कृतघ्नः कः आसीत् ?

**II पूर्णवाक्येन उत्तरत–** **(1x2=2)**

i जनाः किम् कथयन्ति स्म ?
ii मूषकः सिंहः भूत्वाकिम् करोति स्म ?

**III प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत–** **(1x4=4)**

i 'अशपत्' इत्यस्य क्रियापदस्य कर्तृपदम् किम् ?
**(अ)** मुनिः **(ब)** मूषकः
**(स)** ज्ञात्वा **(द)** दुर्भावम्

ii 'तस्य' इतिसर्वनामपदस्य विशेषणम् पदम् किम् ?

(अ) महातप (ब) मुनिः
(स) कृतघ्नस्य (द) अशपत्

iii 'हन्तुम्' इति पदस्य कृते अनुच्छेदे किम् पदम् प्रयुक्तम् ?
(अ) समीपम् (ब) अयम्
(स) मारयितुम् (द) मूषकम्

iv 'भूत्वा' इत्यस्मिन् पदे कः प्रत्ययः ?
(अ) क्त्वा (ब) तुमुन्
(स) तव्यत् (द) अनीयर्

**IV कथायाः समुचितं शीर्षकं लिखत–** (कथा का उचित शीर्षक लिखिए।) **(2X1=2)**

## (खण्ड–ख) रचनात्मकंकार्यम्

**प्र0 2** स्वविद्यालयस्य वार्षिकोत्सवं वर्णयनम् पितर ंप्रति पत्रमेकं लिखत– **(½X10=5)**
(अपने विद्यालय के वार्षिकोत्सव का वर्णन करते हुए पिता के प्रति एक पत्र लिखिए।)

संस्कारः छात्रावासः
रायपुरम्।
तिथिः ––
परम् पूज्याय जनकाय नमः
अत्र सर्वम् कुशलम् तत्रास्तु।

गते (1)––––––अस्माकम् (2)–––––वार्षिकोत्सवः (3) –––––। अस्मिन् उत्सवे (4) –––––प्रमुखातिथि आसीत्। अस्माकम् विद्यालये अनेके सांस्कृतिकाः (5) –––––अभवन्।केचन छात्राः अगायन् केचन च अनृत्यन्। प्राचार्य विद्यालयस्य(6)––––––––अपठत्। शिक्षानिदेशकः (7) –––––अकरोत्। अहम् अपि (8) ––––––प्राप्तवती यतः अहम् कक्षायांप्रथमम् स्थानम् (9) ––––––।

मातृ चरणयोः मम प्रणामाः
(10)––––––––पुत्री

| |
|---|
| भवदीया, पुरस्कारम्, विद्यालयस्य, प्रतिवेदनम्, सप्ताहे, लब्धवती, शिक्षा–निदेशकः, पुरस्कार वितरणम्, कार्यक्रमाः, अभवत् |

**प्र03 मंजूषायाम् प्रदत्त शब्दानाम् सहायतया चित्रं दृष्ट्वा पंचवाक्यानि संस्कृतेन लिखत– (1X5=5)**

| |
|---|
| मेट्रोस्थलम्, सुन्दरम्, स्वगन्तव्य, स्वच्छम्, आरुह्यन्ति, देहलीनगरे, उपकरोति, जनाः, सरलतया, गच्छन्ति, प्रसन्नाः, सन्ति, समयम् च रक्षन्ति। |



**प्र0 4 अधोलिखितम् वार्तालापम् मंजूषायां प्रदत्त उचितैः पदैः पूरयत–** **(1x5=5)**

**राकेशः** हेविजय ! त्वम् कुत्र ––––– ?

**विजयः** अहम् तुफलानिक्रेतुम् विपणम् –––––– ।

**सुधीरः** तिष्ठ ! आवाम् अपित्वया––––––चलिष्यावः।

**विजयः** युवाम् किम् –––––इच्छथः ?

**राकेशः** आवाम् तुस्वानुजाय एकम् क्रीडनकम् क्रेतुम् –––––––।

| गच्छामि, क्रेतुम्, सह, इच्छावः, गच्छसि |
|---|

## (खण्ड–ग) अनुप्रयुक्तव्याकरणम्

**प्र0 5 उचित रूपाणि चित्वा रिक्तस्थानानि पूरयत– (अशुद्धि शोधन)** **(1x5=5)**

**i** तत्र द्वौ––––––गायतः।

(क) गायकः (ख) गायकौ

(ग) गायकाः (घ) गायकम्

**ii** तव–––––आगच्छति।

(क) मित्रः (ख) मित्रे

(ग) मित्रम् (घ) मित्राणि

**iii** ते–––––––पततः।

(क) लतया (ख) लताः

(ग) लताम् (घ) लते

**iv** पिता–––––फलम् यच्छति।

(क) बालकाय (ख) बालकम्

(ग) बालकैः (घ) बालकात्

v वानरः ———————पतति।

(क) वृक्षे (ख) वृक्षात्

(ग) वृक्षम् (घ) वृक्षस्य

**प्र0 6 उचितम् विकल्पम् चित्वा रिक्तस्थानानि पूरयत– (कारक) (1X4=4)**

i ———————भोजनम् करोमि।

(क) आवाम् (ख) अहम्

(ग) वयम् (घ) त्वम्

ii नद्यः ———————वहन्ति।

(क) परोपकाराय (ख) परोपकारः

(ग) परोपकारैः (घ) परोपकारम्

iii चित्रकारः ———————रचयति।

(क) चित्रे (ख) चित्रम्

(ग) चित्रस्य (घ) चित्रात्

iv छात्राः ——————पठन्ति।

(क) ग्रन्थेषु (ख) ग्रन्थम्

(ग) ग्रन्थः (घ) ग्रन्थान्

**प्र0 7 अंकेन लिखितं समयं संस्कृतपदेन लिखित्वा रिक्तस्थानानि पूरयत– (1X4=4)**

i गोविन्दःप्रातः 5:30 ———————वादनेउत्तिष्ठति।

ii सः 6:30———————वादने क्षेत्रम् गच्छति।

iii सः 12:45 —————पर्यन्तम् कार्यम् करोति।

iv सः 1:15 ——————वादने गृहम् आगच्छति।

**प्र0 8 कोष्ठकात् उचितम् संख्यापदं चित्वा लिखत– (1X4=4)**

i सप्ताहे———————दिवसाः भवन्ति। (सप्ताः / सप्त )

ii अत्र ——————— गजौ स्तः। ( द्वौ / द्वे )

iii एकस्मिन् हस्ते—————अंगुष्ठः भवति। (एकः / एके )

iv सरोवरे—————— कमलानि सन्ति। (चत्वारि / चत्वारः )

**प्र0 9 प्रदत्तविकल्पेभ्यः उचितानि स्थूलप्रत्ययपदानि चित्वा लिखत– (1X4=4)**

i बालकः भोजनम् **खादित्वा** गच्छति।

(क) खाद् + क्त्वा (ख) खाद् + कतवा

(ग) खादि + क्त्वा (घ) खा + दित्वा

ii विद्यार्थी **सम् + पठ् + ल्यप्** परीक्षायाम् गच्छति।

(क) समपठय (ख) सम्पठ्य

(ग) सम्पाठ्य (घ) सम्पठति

iii अहम् लेखम् **लिख् + तुमुन्** इच्छामि।

(क) लेखितुम् (ख) लाखितुम

(ग) लिखितुम् (घ) लिखतुमुन्

iv अपराधी **दण्डनीय** भवति।

(क) दण् + अनीय (ख) दाण्ड् + अनीय

(ग) दण्ड + अनीयर् (घ) दण्ड् + अनीय

**प्र0 10 प्रदत्तविकल्पेभ्यः उचितम् उपपदम् चित्वा लिखत–** **(1X4=4)**

i छात्रः ——–—— प्रति गच्छति।

(क) विद्यालये (ख) विद्यालयम्

(ग) विद्यालयात् (घ) विद्यालयेन

ii ——–—— सह सीता गच्छति।

(क) रामेण (ख) रामम्

(ग) रामाय (घ) रामस्य

iii माता ——–– क्रुध्यति।

(क) पुत्रः (ख) पुत्रौ

(ग) पुत्राय (घ) पुत्रेण

iv बालः ——–– बिभेति।

(क) सिंहः (ख) सिंहात्

(ग) सिंहस्य (घ) सिंहेन

## (खण्ड–घ)पठितअवबोधनम्

**प्र0 11 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितानां प्रश्नानाम् उत्तराणि ालिखत–**

संस्कृते विद्यमानः सूक्तयः अभ्युदयाय प्रेरयन्ति, यथा– 'सत्यमेवजयते', 'वसुधैवकुटुम्बकम्', 'विद्ययाऽमृतमश्नुते', 'योगः कर्मसुकौशलम्' इत्यादयः। सर्वभूतेषु आत्मवत् व्यवहारम् कर्तुम् संस्कृतभाषा सम्यक् शिक्षयति। केचन कथयन्ति यत् – ''संस्कृतभाषायाम् केवलम् धार्मिकम् साहित्यम् वर्तते।'' एषा धारणा समीचीना नास्ति। संस्कृतग्रन्थेषु मानवजीवनाय विविधाः विषयाः समाविष्टाः सन्ति। महापुरुषाणां मतिः उत्तमजनानाम् धृतिः सामान्य जनानाम् जीवनपद्धतिः च वर्णिताः सन्ति। अतः अस्माभिः संस्कृतम् अवश्यमेव पठनीयम्।तेन मनुष्यस्य समाजस्य च परिष्कारः भवेत्।

**I एकपदेन उत्तरत–** **(1X2=2)**

i के अभ्युदयाय प्रेरयन्ति ?

ii संस्कृत भाषा किम् शिक्षयति ?

**II पूर्णवाक्येन उत्तरत–** **(2X1=2)**

i अस्माभिः संस्कृतम् किमर्थम् पठनीयम् ?

**III उचितम् उत्तरम् चित्वा लिखत–** **(1X2=2)**

i 'पठनीयम्' इत्यत्र कः प्रत्ययः ?

(अ) क्त्वा (ब) ल्यप्

(स) अनीयर् (द) तव्यत्

ii 'मतिः'इति पदे काविभक्ति ?

(अ) षष्ठी (ब) पंचमी

(स) प्रथमा (द) द्वितीया

**प्र0 12 अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

नचौरहार्यम् न च राजहार्यम्
न भ्रार्तृभाज्यम् न च भारकारि।
व्ययेकृते वर्धते एव नित्यं
विद्याधनम् सर्वधनम् प्रधानम्।।

**I एकपदेन उत्तरत–** **(1x2=2)**

i व्यये कृतेकिम् वर्धते ?

ii किम् च न भारकारि ?

**II पूर्णवाक्येन उत्तरत–** **(2x1=2)**

i सर्व प्रधानम् धनम् किम् भवति ?

**III उचितम् उत्तरम् चित्वा लिखत–** **(1x2=2)**

i 'व्यय' इति पदस्य विलोमपदम् किम् ?

(अ) प्रतिदिनम् (ब) आय

(स) धनम् (द) कृते

ii 'प्रतिदिनम्' इत्यर्थे श्लोके किम् पदम् प्रयुक्तम् ?

(अ) चौरः (ब) भ्रातृ

(स) नित्यम् (द) प्रधानम्

**प्र0 13 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

**अनारिका** पितः! मन्त्री किमर्थम् आगच्छति ?

**पिता** पुत्रि ! नद्यः उपरि नवीनः सेतुः निर्मितः। तस्य उद्घाटनार्थम् मन्त्री आगच्छति।

**अनारिका** किम् मन्त्री सेतोः निर्माणम् अकरोत् ?

**पिता** न हिपुत्रि ! सेतोः निर्माणम् कर्मकराः अकुर्वन्।

**अनारिका** यदिकर्मकराः सेतोः निर्माणम् अकुर्वन् तदामन्त्री किमर्थम् आगच्छति ?

**पिता** यतोहि सः अस्माकम् देशस्य मन्त्री।

**अनारिका** सेतोः निर्माणाय प्रस्तराणि कुतः आयान्ति किम् तानि अपि मन्त्री ददाति ?

**पिता** अनारिके ! प्रस्तराणि जनाः पर्वतेभ्यः आनयन्ति।

**अनारिका** पितः! तर्हिकिम् एतदर्थम् मन्त्री धनम् ददाति ? तस्य पार्श्वे धनानि कुतः आगच्छन्ति ?

**पिता** अरे ! प्रजाः सर्वकारायः धनम् यच्छन्ति।

**I एकपदेन उत्तरत–** **(1x2=2)**

i के सर्वकाराय धनम् यच्छन्ति ?

ii मन्त्री किमर्थम् आगच्छति ?

**II पूर्णवाक्येन उत्तरत–** **(2x1=2)**

i सेतोः निर्माणाय कर्मकराः किम् कुर्वन्ति ?

**III उचितम् उत्तरम् चित्वा लिखत–** **(1x2=2)**

i ‘नवीनसेतुः’ इत्यत्र विशेषणम् पदम् किम् ?

(अ) सेतुः (ब) उपरि

(स) नवीनः (द) नद्याः

ii ‘अकुर्वन्’ इति क्रियापदस्य कर्तृपदम् किम् ?

(अ) कर्मकराः (ब) पिता

(स) पुत्रि (द) मन्त्री

**प्र0 14 अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत– (1X4=4)**

i <u>शत्रूणाम्</u> समक्षम् विजयः सुनिश्चितः भवेत्।

(अ) कस्याम् (ब) केषाम्

(स) का (द) काभ्याम्

ii कालेन <u>चटकायाः</u> सन्तति जाता।

(अ) कस्य (ब) कस्याः

(स) कुत्र (द) केन

iii विद्याविहीनः <u>नरः</u> पशु भवति।

(अ) केभ्यः (ब) कस्याः

(स) कः (द) के

iv <u>वरिष्ठान्</u> प्रति अस्माभिः प्रियम् व्यवहर्तव्यम्।

(अ) केन (ब) कस्मात्

(स) कान् (द) कया

**प्र0 15 उदाहरणानुसारं पदपरिचयं लिखत– (1X4=4)**

| | पदानि | लिङ्गम् | विभक्ति | वचनम् |
|---|---|---|---|---|
| उदा0 | चन्द्रस्य | पुल्लिंग | षष्ठी | एकवचन |
| i | बन्धुः | –––––––– | –––––– | –––––– |
| ii | देशान् | –––––––– | –––––– | –––––– |
| iii | घृणायाः | –––––––– | –––––– | –––––– |
| iv | कुटुम्बकम् | –––––––– | –––––– | –––––– |

**प्र0 16 समानार्थक पदानि मेलयत– (½X4=2)**

| | |
|---|---|
| धरणि | जले |
| करालम् | वने |
| सलिले | पृथिवी |
| विपिने | भयंकरम् |

**प्र0 17 अशुद्धं पदम् चिनुत– (½X4=2)**

| | | | | |
|---|---|---|---|---|
| i | चन्द्रः | सूर्यः | अम्बुदः | शुक्र |
| ii | पत्राणि | पुष्पाणि | फलानि | मित्राणि |
| iii | जलचरः | खेचरः | भूचरः | निशाचरः |
| iv | गावः | सिंहः | कच्छपाः | गजाः |

–––00–––